तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

January 2026

Rs.20/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 10
January 2026, Price Rs.20/-
No. of pages-24



## श्रीवेङ्कटेश्वरस्वामिनः सप्तवाहनसेवाः

## रथसप्तमी (25.01.2026)

तिरुमलतिरुपतिदेवस्थानानि

# तिरुमलस्थ श्रीवेङ्कटेश्वरस्वाम्यालये

## आर्जितसेवाः



| क्रम संख्या | सेवायाः नाम | सेवासमयः -- | सेवा मूल्यम् | व्यक्तीनां संख्या |
|---|---|---|---|---|
| | **दैनिकसेवाः** | | | |
| 1. | सुप्रभातम् | प्रातः 3.00 कालः | 120/- | 1 |
| 2. | तोमाल सेवा (भौम्य,सौम्य, बृहस्पतिवासरम्) | प्रातः 3.30 कालः | 220/- | 1 |
| 3. | अर्चना (भौम्य,सौम्य, बृहस्पतिवासरम्) | प्रातः 4.30 कालः | 220/- | 1 |
| | **दैनिकोत्सवाः** | | | |
| 4. | कल्याणोत्सवः | मध्याह्णकालः 12.00 कालः | 1000/- | 2 |
| 5. | डोलोत्सवः (ऊञ्जलसेवा) | अपराह्णम् 2.00 कालः | 500/- | 1 |
| 6. | आर्जितब्रह्मोत्सवः | अपराह्णम् 3.00 कालः | 500/- | 1 |
| 7. | सहस्रदीपालङ्करसेवा | सायं 5.00 कालः | 500/- | 1 |
| | **साप्ताहिक सेवाः** | | | |
| 8. | अष्टदलपादपद्माराधनसेवा(भौमवासरम्) | प्रातः 9.30 कालः | 1,250/- | 1 |
| 9. | तिरुप्पावडसेवाः (बृहस्पतिवासरम्) | प्रातः 7.00 कालः | 850/- | 1 |
| 10. | अभिषेक (भृगुवासरम्) | प्रातः 4.30 कालः | 750/- | 1 |
| | **वार्षिक / सामयिक सेवाः** | | | |
| 11. | प्लवोत्सवः (फिब्रवरी - मार्च्) | रात्रौ 7.00 कालः | 500/- | 1 |
| 12. | वसन्तोत्सवः ( मार्च् -एप्रेल्) | अपराह्णः 2.00 कालः | 300/- | 1 |
| 13. | ज्येष्ठाभिषेकः (अभिदेयक अभिषेकः) (जून्) | प्रातः 9.00 कालः | 400/- | 1 |
| 14. | पवित्रोत्सवः (आगस्ट्) | प्रातः 9.00 कालः | 2,500/- | 1 |
| 15. | पुष्पयागः (अक्टोबर् - नवम्बर्) | प्रातः 9.00 कालः | 700/- | 1 |

टोल् फ्री संख्या - १५५२५७

वाट्स्प् फीड ब्याक् संख्या - ९३९९३९९३९९

ई - मैल्. ऐ.डी. helpdesk@tirumala.org

उपर्युक्त सूचितसेवा टिकेट् आनलैन् द्वारा एव बुकिंग कर्तव्यम्।
अन्य विवरणार्थं ति.ति.दे. वेब्सैट् - www.ttdevasthanms. ap.gov.in द्वारा अपेक्षित विषयः ज्ञातव्यः।

उपर्युक्तविषये परिवर्तनमपि स्यात्।

## गीतामृतम्

श्रीभगवानुवाच -

तस्माद्यस्य महाबाहो! निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेषु तस्य प्रज्ञा प्रतिष्ठिता।।

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।।

(भगवद्गीता २.६८,६९)

६८. भावः - हे अर्जुन! यस्मात्कारणात् यस्य ब्रह्मनिष्ठस्य इन्द्रियाणि विषयेभ्यः सर्वैः प्रकारैः निगृह्यन्ते तस्य ब्रह्मनिष्ठस्य ज्ञानं स्थिरं भवति। सः एव स्थितप्रज्ञः इत्युच्यते।

६९. भावः - समस्तप्राणिनां अर्थात् अज्ञानिनां यत् (आत्मज्ञानं) रात्रिर्भवति (मनोदृष्टेः अगोचरो भवति) तस्मिन्नात्मज्ञाने इन्द्रियनिग्रहविशिष्टः योगी जागरूको भवति। (आत्मावलोकनं करोति। येषु इन्द्रियविषयेषु अज्ञानिनः जागरूकाः भवन्ति, विषयासक्त्या प्रवर्तन्ते, सः इन्द्रियव्यापारः आत्मावलोकनमुनेः रात्रिर्भवति।

विशेषांशः - आत्मज्ञानिनः यत् दिवा भवति अज्ञानिनः तत् रात्रिर्भवति। अज्ञानिनः यत्दिवा भवति आत्मज्ञानिनः तत् रात्रिर्भवति। न केवलं प्रपञ्चे मनुष्याणां सकलप्रणिकोटयः अपि जाग्रत्स्वप्नसुषुप्तीनां हेतुभूत स्थूल सूक्ष्मकारणदेह पर्यन्तमेव सञ्चरन्ति। अर्थात् जाग्रदवस्थायां स्थूलदेहे, स्वप्नावस्थायां सूक्ष्मदेहे सुषुत्प्यवस्थायां कारणदेहे विहरन्ति। पश्चात् सुषुप्तेः स्वप्नं, स्वप्नात् जाग्रद्दशां प्राप्नुवन्ति। त्रयः मायालोकाः। सम्यक् इन्द्रियविजेता योगी त्रयस्यापि विलक्षणमहाकारणतुरीयपदे स्यात्। सः स्वप्रकाशः, ज्ञाननिलयः। अन्ये अज्ञानमयाः। अत एव ते अन्धकारमायामग्नाः भवन्ति।

## सङ्कीर्तनम्

नमो नारायणाय
नारायणाय सुगुणब्रह्मणे सर्व
पारायणाय शोभनमूर्तये नमो
नित्याय विबुध संस्तुत्याय नित्याधि
त्याय मुनिगणप्रत्ययाय
सत्याय प्रत्यक्षाय सन्मानससा
ङ्गत्याय जगदवनकृत्याय ते नमो



अक्रमोद्भुतबाहुविक्रमातिक्रान्त
शुक्रशिष्योन्मूलक्रमाय
शक्रादिनिर्वाणविक्रभय भङ्गानि
र्वक्राय निहतारिचक्राय ते नमो
अक्षरायातिनिरपेक्षाय पुण्डरी-
काक्षाय श्रीवत्सलक्षणाय
अक्षीणविज्ञानदक्षयोगीन्द्रसं
रक्षानुकम्पाकटाक्षाय ते नमो
करिराजवरदाय कौस्तुभाभरणाय
मुखैरिणे जगन्मोहनाय
तरुणेन्द्रकोटीरवरुणीमनस्तोत्र
परितोषचित्ताय परमायते नमो
पात्रदानोत्सवप्रथितवेङ्कटराय
धात्रीशकामितार्थप्रदाय
गोत्रभिन्मणिरुचिरगात्रायरविचन्द्र
नेत्राय शेषाद्रिनिलयाय ते नमो।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ३६)

अति स्नेहः पापशङ्की, अत्यादरः शङ्कनीयः।

# सूर्यसंक्रान्तिः

आदित्यानामहं विष्णुः ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहंशशी।। भगवद्गीता -१०-२१

नारायणस्वरूपः सूर्यभगवान् आरम्भादेव आकाशे प्रकाशमानः प्रपञ्चस्य कान्तिं उष्णं प्रददाति। सूर्याय सहस्रवर्षेभ्यः पूर्वादपि अर्चनाराधननिर्वाहः महाविशेषः इति वक्तुं शक्यते।

श्रीमद्विराटस्वरूपश्रीमन्नारायणनयने एव सूर्यः। तादृशसूर्यः मासे मासे भिन्नराशौ प्रविशति। एतत्प्रवेशः एव संक्रमणं संक्रान्तिरिति वदामः। एवं द्वादश संक्रान्तयः आगच्छन्ति। तेषां मेषसंक्रमणं, तुलासंक्रमणं मकरसंक्रमणं, कर्काटक संक्रमणं, प्रधानानि। धनुस्संक्रमणात् मकरसंक्रमणपर्यन्तं विद्यमान त्रिंशद्दिनेषु धनुर्मासव्रतं प्रवर्तते।

श्रीवैष्णवसंप्रदाये मुख्यव्रतमिदम्। सूर्यागमनात् आगतपर्वदिनत्वात् संक्रान्तिरिति वदन्ति। भगवते सूर्याय अस्मिन् काले विशिष्टाराधनानि प्रवर्तन्ते।

कर्मसाक्षी सूर्यः स्वयंभूः। ग्रहाणामदिपतिः सहस्रकिरणः, सप्तश्वैः स्वर्णरथे प्रगच्छति। अतः सूर्यः सप्तसंख्याप्रधानः। एतादृश सूर्यस्य मकरराशिप्रवेशसमयः मकरसंक्रान्तिः। जीवनस्रवन्त्यां अत्यन्तप्राधान्य सर्वेष्टपर्व एव संक्रान्तिपर्वदिनम्। इमां मकरसंक्रान्मिेव स्वर्णसंक्रानिरिति वदन्ति। रथसप्तमीसन्दर्भे पुरस्कृत्य तिरुमलपुण्यक्षेत्रे अत्यन्तवैबवोपेततया अर्ध ब्रह्मोत्सनाम्ना एकस्मिन्नेव दिने सप्तवाहनेषु स्वामी वेङ्कटेश्वरः तिरुमाडवीथीषु परिभ्रमन् भक्तेभ्यः दर्शनभाग्यं दत्वा अभिलषितवराणि ददाति। उदयादारभ्य सूर्यप्रभवाहने, लघुशेषवाहने, गरुड वाहने, हनुमद्वाहने परिभ्रमणानन्तरं मध्याह्ने स्वामिणे पुष्करिणीतीर्थे चक्रस्नानं प्रवर्तते। पश्चात् मध्याह्णादारभ्य कल्पवृक्षवाहने सर्वभूपालवाहने चन्द्रप्रभावाहने परिभ्रमन् भक्तेभ्यं दर्शनभाग्यं ददाति। सर्वावाहनसेवाः एकदिने एव दृष्ट्वा स्वामिनां आशीर्वाद प्राप्य संसारसागरात् उद्धरेम।



क्रोधनं व्यसने हन्ति स्वजनमपि नराधिपम्।

# जनवरि - २०२६

सम्पुटिः-१२ सञ्चिका-१०

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर पुष्यशुद्धत्रयोदशीगुरुवारादारभ्य - माघशुद्धचतुर्दशी - शनिवारपर्यन्तम् - २०२६


मकरसंक्रान्तिः 06
- डा के.कोटेश्वरय्य

गोदापरिणयोत्सवः 08
- डा पि.माधवी

सत्यधर्मपालिकायाः सत्यवत्याः धार्मिकप्रवृत्तिः 10
- डा वि.माधवरेड्डि

त्यागराजस्वाम्याराधनम् 16
- आचार्य जि.पद्मनाभम्

पक्षिणः अपि प्राणत्यागस्यापि संसिद्धाः धर्मरक्षणकृतज्ञतां प्रदर्शयन्ति 19
- डा एन्.गुणवती

धर्मसूक्ष्मः (चित्रकथा) 20

पश्चात्तापः (चित्रकथा) 21
- डा.के.सूर्यनारायणरेड्डि

द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः


मुखचित्रम् - सप्तवाहनसेवा श्रीमलयप्पस्वामी, तिरुमल।

अन्तिमपुटचित्रम्:- श्रीमलयप्पस्वामी, तिरुमल।


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३

सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -

chiefeditortpt@gmail.com


एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

आत्मा हि दाराः सर्वेषां दारसंग्रहवर्तिनाम्।

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका





गौरवसम्पादकः:-
श्री अनिल् कुमार सिंघाल् I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयकेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः, ति.ति.दे.




सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
*— प्रधानसम्पादकः*







- डा.के.कोटेश्वरय्य

चरवाणी
९९८५१२३२६२


जनवरिमासे १४ तिथिः अतीवमुख्यं दिनम्। यावद्भारते हिन्दूनां सूर्यस्य दक्षिणायनात् उत्तरायणगमनप्रारम्भदिवसः। एतदर्थमेव भीष्माचार्यः बाणशय्ययां स्थित्वा निरीक्षते स्म। कुरुक्षेत्रस्य ब्रह्मसरोवरे प्रयागस्थत्रिवेणी सङ्गमे बङ्गालाखातस्य गङ्गासागरसङ्गमस्थले लक्षाधिकजनाः स्नानं कुर्वन्ति। शबरिमलै पुण्यक्षेत्रेऽपि तस्मिन्नेव दिने आकाशे ज्योतिदर्शनाय लक्षाधिकभक्ताः आगच्छन्ति। अस्माकं पर्वाणि गूढसङ्केतप्रदानि। पर्वणां सर्वेषां पुराणेतिहासाः आधाराः। दक्षइत्यस्य वर्धनमिति उत्तर इत्यस्य तरणात् ऊर्ध्व गमनमित्यर्थः। शास्त्रज्ञैः आकाशे सूर्यपरिशीलनात् जीवनामकसूर्यगमनं ऋषिभिः अवगतम्। श्वेतकान्तिस्थसप्तेन्द्रधनुर्वर्णानि सप्ताश्वानिव कृत्वा आकाशे सूर्यः सञ्चरति। ज्ञानेन्द्रियाणि, मनः, बुद्धिः सप्त अश्वान् कृत्वा जीवः शरीररथे प्रपञ्चे परिभ्रमति। आकाशे सूर्यस्य दक्षिणायन गमने कान्तिहीनतया अन्धकारः विजृम्भते। जीवनाम सूर्यः विषयाकर्षणे लग्नः प्रपञ्चे बद्धः भवति। तस्मिन्नन्धकारः वर्धते ज्ञानं हीनं भवति।

आकाशे सूर्यस्य उत्तरायणगमने अन्धकारहासः कान्तेः वृद्धिश्च भवति। जीवनामकसूर्यः इन्द्रियाणि मनः निगृह्य विचक्षणज्ञानेन विषयवस्तूनि परिहृत्य परमात्मानमधिकृत्य यदा ज्ञानप्रकृत्तौ भवति तदा अज्ञानान्धकारः ह्रासं प्राप्नुवन् ज्ञानकान्तिः वर्धते। एतत्सूचनार्थमेव मकरसंक्रान्तिसन्दर्भे देशे सर्वविधपर्वाणि पूजाः अधिकृत्य प्रवृत्ताः कथाः जीवसूर्ये संक्रमणमधिकृत्य विवृण्वन्ति। दशदिनयुद्धानन्तरं कुरुक्षेत्रे भीष्माचार्यः अधःपतितः। परन्तु न मृतः। स्वबाल्ये पितृवांछापूर्त्यर्थं भीष्मकृतात्युत्तमत्यागं मनसि कृत्वा शन्तनः भीष्माय स्वच्छन्दमरणंवरं ददौ। अतः भीष्माचार्यः दक्षिणायनकाले स्वप्राणान् धरन् बाणशय्यायां शयित्वा कालं नयन् उत्तरायणपुण्यकालागमनानन्तरमेव स्वप्राणान् तत्याज।

यावज्जीवम् अन्यायपरकौरवपक्षे जीवनयात्रां निर्वहन् कुरुक्षेत्रे कौरवपक्षे चण्डप्रचण्डतया युद्धमाचरतः भीष्मस्य मनः क्रौर्यपूरितमासीत्। तन्मनः बाह्यप्रवृत्तौ धावत् सत् परमात्म समीपं न गतम्। अतः कठिनबाणशय्यायां विद्यमानं मनः क्रमशः भीष्मं दैवाभिमुखञ्चकार। भीष्मः बहिरागतज्ञानगङ्गां पपौ। पाण्डवेभ्यः उत्तमधर्मप्रबोधं कृत्वा श्रीकृष्णरूपं पश्यन् प्राणान् तत्याज। एवं प्रापञ्चिकप्रमेयान् परित्यज्य परमात्मदर्शनं प्राप्तं मनः पुनः लौकिक प्रपञ्चं न प्रवेक्ष्यति। तस्य पुनर्जन्म भीष्माय पितृतः स्वच्छन्दमरणवरं अस्माकं सर्वेषां पुरुषार्थ साधक शक्तिरेव। लौकिकप्रपञ्चस्मरणेन प्राणत्यागो वा भगवत्स्मरणेन प्राणत्यागो वा इति आत्मेच्छा। मनसः दमनं बाणशय्यैव। तत्कर्मकृतवतां अन्तः ज्ञानगङ्गा आगत्य आध्यात्मिकतृष्णां पूरयित्वा भगवद्दर्शनं कारयति।

आन्ध्रप्रदेशे संक्रान्तिकालः सस्यपक्वात् धान्यागमनकालसमयः। पातालस्थः बलिचक्रवर्ती उपर्यागतः



भूलोकदर्शनं कृत्वा पुनः पातालं गतः कालः संक्रान्तिकालः इति वदन्ति। मानसिकसंक्रमणादेव आध्यात्मिकसम्पन्न जीवहृदयः प्रकाशते। व्यक्तित्वे अधःपतितत्यागबुद्धिः बहिरागछति। जीवः सर्वस्वं भगवते बलिमिव समर्पयति।

त्रिवेणीसङ्गमस्नानं जीवितं कथं उत्तरायणभिमुखं कर्तव्यमिति सूचयति। भक्ताः गङ्गायमुनासरस्वतीसङ्गमे स्नानमाचरन्ति। गं नाम पुरोगत्या व्यवहारः। यं नाम निग्रहेण प्रवर्तनम्। जीविते त्वरया निर्णयावश्यकतासन्दर्भाः शनैः निग्रहप्रदर्शन सन्दर्भाश्च वर्तन्ते। ज्ञानसरस्वतीमाधारीकृत्य उभयसमन्वयतया जीवनप्रवाहे स्नानं कृतश्चेत् तदेव सत्यसंक्रमणमिति शास्त्राणि सूचयन्ति। समुद्रे गङ्गासागरसङ्गम स्नानमपि एतादृशसूचनामेव करोति। भगीरथस्य अचञ्चलदीक्षातपोभिः आकाशगङ्गा भूमावततीर्य पाताले प्रविश्य अधोलोकस्थसगरपुत्रेभ्यः ऊर्ध्वलोकगतिं ददौ। तीव्रदीक्षाप्रयत्नैः अत्युत्तमज्ञनगङ्गा अस्मासु प्रविश्य अन्तरान्तरनिगूढकल्मषं दूरीकृत्य अस्मान् पवित्रान् कृत्वा अस्मदृष्टिं उन्नतमार्गगामिनीं करोति। शबरिमलैक्षेत्रे संक्रान्तौ अय्यप्पस्वामिदर्शनं प्राप्य सायं समये आकाशज्योतदर्शनार्थं भक्ताः लक्षाधिकतया गच्छन्ति। दीक्षायुताः साधकाः शिरसि यिरुमुडिं धृत्वा अष्टादशसोपानपक्तिमधिरुह्य स्वामिदर्शनं कृत्वा पार्श्वमपश्यन्तः अवरुह्य आगच्छन्ति। सायंसमये आकाशे ज्ञानज्योतिः उत्साहेन पश्यन्ति। १८ सोपानपक्तिः जीवः। जीवने दृश्यमान क्लेशप्रपञ्चः द्वयोः प्रतीके भवतः। पञ्चभूतनिर्मितः स्थलप्रपञ्चः। एतत्प्रपञ्चं दशेन्द्रियद्वारा पश्यन्ति। इन्द्रियाणां पश्चात् मनो बुद्ध्यहङ्कारनामक सूक्ष्मपरिकराः स्वकर्माचरन्ति। अष्टादशमिलित्वा जीवं प्रपञ्चं निर्मान्ति। तदतीत्य स्वामिदर्शनं कुर्वन् जीवः ज्योतिदर्शन भाग्यं प्राप्नोति। एतादृशपर्वदीक्षापूजाः मानवं लौकिकबन्धेभ्यः विमुक्तं कृत्वा मुक्तिमार्गं नेतुं प्रदुर्भूताः। एतादृशसूचनाः ज्ञात्वा मानवाः संसारसागरं तरन्तु।

**ग्रहणामादिरादित्यो लोकरक्षणकारकः।**
**विषमस्थानसम्भूतां पीडां हरतु मे रविः॥**
**जपाकुसमसङ्काशं काश्यपेयं महाद्युतिं।**
**तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥**



# गोदापरिणयोत्सवः

- डा.पि.माधवी
चरवाणी - ८५१९८०४७८४

रङ्गनाथः स्वालयाधिकारिणः एवमुवाच ''मङ्गलवाद्यैः छत्रचामरादिभिः - परिजनानुगम्यमानाः यूयं सर्वे विल्लिपुत्तूरुनगरं गत्वा तत्र विष्णुचित्तात्मजां सबहुमानं आनयत।'' तामहमत्र परिणेष्यामीति।। तेऽपि शीघ्रमेव श्रीविल्लिपुत्तरुक्षेत्रं असंख्याकजनावृताः ययुः। विष्णुचित्तस्य शिष्यः वल्लभदेवोऽपि गोदादेव्या नुस्रियमानः चतुरङ्गबलेन श्रीरङ्गं प्रतस्थे। सुवर्णशिबिकायां वधूः आरोहिता। छत्रचामरादिभिः भेरीकोहलादिकर्णभेदिनिनादैः विवाहजनाः प्रस्थिताः। धन्विनव्यपुरात् श्रीरङ्गपर्यन्तं मार्गः सर्वोऽपि भिन्नाभिन्नवर्णमालाभिः तोरणैः छायाकारकवस्त्राभिः अलङ्कृतः। तद्दिनं श्रीरङ्गं कलियुगवैकुण्ठं इव नयनपर्व शौभायमानं अजायत। चोलपाण्ड्यचेरादि प्रजाः विवाहं नेत्रपर्वतया द्रष्टुमागताः।



श्रीरङ्गक्षेत्रे सप्तप्रकाराः कदलीक्रमुक स्तम्भाधिभिरलङ्कृताः। भूमिः मौक्तिकरङ्गवल्लीभिरलङ्कृता। शुभमुहूर्ते वधूमङ्गलस्नानं कारितवन्तः।पश्चात्सा रङ्गनाथमेव मनसा ध्यायन्ती सुवर्णशिबिकाधिरूढा स्वामिसन्निधिं प्रस्थिता। श्रीवैष्णवाः संस्कृतद्राविड दिव्यप्रबन्धाध्ययनं कुर्वन्तः पुरश्चलन्तिस्म, तत्पश्चात् सर्वालङ्कृतद्वौ भद्रगजौ द्वावश्वराजौ च आगच्छन्ति स्म। पश्चात् आनन्देन अप्सरस्त्रीवेश्याङ्गनाः नृत्यगीतवाद्यैः तत्रत्यजनं विनोदयन्तः गच्छन्तिस्म। वध्वाः शिबिकां शतसहस्रसंख्याभिरनुगच्छन्ति स्म। अन्ते सुवर्णवेत्रहस्ताः मङ्गलध्वनिंश्रावयन्तः गच्छन्तिस्म।

वैभवेन सः विवाहोत्सवः वाचामगोचरसम्मर्दः प्रधानद्वारं प्रविवेश। एतन्महोत्सवदर्शनागतमहिलाजनः अन्दोलिकाः अधिरुह्य मङ्गललाजावर्षं वर्षापयन्ति स्म। आवरणसप्तके प्रदक्षिणमाचर्य गोदादेवी शन्तनुमण्टपं प्रविवेश। तत्पूर्वमेव श्रीपतिश्च मङ्गलस्नानं कृत्वा सर्वालङ्कारधारी सन् वध्वागमनकुतुहली संसिद्धः











अनिर्वर्ण्यं परकलत्रम्।

आसीत्। सुमुहूर्ते सुलग्ने द्विजदेवाग्निसन्निधौ रङ्गनाथः गोदादेवीपाणिग्रहणं कृत्वा अतुलितानन्दमवाप। इयं घटना गोदादेव्याः अमितानन्दप्रदायिणी वाग्भिःवर्णयुतुं अशक्या। रङ्गेशस्य अर्धाङ्गलक्ष्मी शेषतल्पे श्रितं मूलविराजं समीप्य सेवन्तीकुतूहलमभजत। अतः शन्तुनमण्टपं परित्यज्य रङ्ग विमान प्रदक्षिणमाचर्य शेषशय्यां प्राप्तवती। रङ्गनाथस्थलावण्य सौन्दर्याणि मनसा अनुभूता साध्वी गोदादेवी शेषतल्पधिरूढा पश्चात् मूलमवाप। पश्चात् सा पुनः न दृष्टा। तदा सर्वे आश्चर्यचकिताः आसन्। विष्णुचित्तस्य दुःखस्य अवधिरेव नासीत्। दुःखनिमग्नं तापसमुद्दिश्य रङ्गनाथः एवमवोचत्। मातुल! कुतस्ते विचारः? भवतापि अपि पुत्रीवियोगात् प्राकृत इव दुःखप्रदर्शमनुचितम्। सागरः इव त्वमपि मम मातुलः। (माम) अतः गर्वेणानन्दमनुभवामि। भवद्दत्ता तनया मयि लीना जाता। तस्याः मानवावतारकर्म समाप्तम्। तस्याः चर्याः एव भावयन् तद्रचितमालिकाः मननं कुर्वन् कालं सानन्दं यापय, चिन्तां परित्यज। विष्णुचित्तेनापि कारणजन्मभूता स्वपुत्रिका मां परित्यक्तेति चिन्तां परित्यज्य विल्लिपुत्तूरुक्षेत्रे पूर्ववत् मालाकैङ्कर्ये वटपत्रशायिनं सेवमानः ८५ वर्षे विष्णुसायुज्यमवाप। श्रीरङ्गनाथः गोदादेव्यै प्रत्येकालयं निर्माय नित्योत्सवैः तदर्चनाय समुचित सौकर्याणि चकार। तदाप्रभृति दिव्यदेशविष्णवालयेषु गोदादेवीं प्रतिष्ठाप्य अर्चनानि प्रर्वर्तयन्ति। द्वादशाल्वारुषु गोदादेवी, शठकोपः रामानुजः तिरुमङ्गयाल्वारु विशिष्ट विष्णवालयाः एव दिव्यदेशाः।

कवितासुमालाः - कर्कटे पूर्वफल्गुण्यां तुलसीकाननोद्भवां।
पाण्ड्ये विश्वम्भरां गोदां वन्दे श्रीरङ्गनायकीम्।।
२. नीलातुङ्गस्थगिरितटीसुप्तमुद्बेध्य कृष्णं सारार्थ्यं
स्वं श्रुतिशतशिरस्सद्धमध्यापयन्ती स्वोच्छिष्टायां



स्रजि निगलितं या बलात्कृत्य गोदा
तस्यै नम इदमिदं भूय एवास्तु भूयः।।

गोदादेवी जनकमेव सन्तोषयितुं न जाता। अस्मत्सदृश बद्धचेतसां संसारसागरतारणार्थं आविर्भूता।तन्मङ्गलां कवितासुमालां कण्ठस्थीकृतञ्चेत् मोक्षार्हाः भगवत्पादारविन्दं प्राप्स्यामः।

इयं ग्रन्थद्वयं व्यरचीत्। तत्र ३० पाशुरयुतगाधा सुप्रसिद्धा। तत्र अन्त्यपाशुरम् - अस्य आन्ध्रानुवादपद्मम् -

सीमू नीक्षीराब्धिजिल्किन श्रीघवुगेशबु
सम्यगलङ्कृतचन्द्रमुखुलु चेरिसंप्रीथिञ्चि स्थिरमेनकोरिकलू
चेरि संप्रीर्थिञ्चि स्थिरमैनकोरिकलू पोन्दिनरीतिग बुडमि
यन्वु श्रीविल्लिपुत्तूरसित पद्ममालिकल्
ताल्यिबभट्टरु तनयद्रविड भाषनु परममौ पद्यमालिकलनु
मुप्पदिसायिचे नोप्पिदमुग ते -गीता - भक्तिवीनिनिबठयिचु
भक्तनरुलु नाल्गुभुज भूधरम्बुलनेल्गुनट्टि यरुणलोचनमुल
नोप्पुहरिकटाक्ष मन्दिसुखसम्पदलगान्तुरनवरतमु।

**पाठकेभ्यः विज्ञप्तिः**

डिसेम्बरमाससंस्कृतपत्रिकायां "अतिममकारः अपकारायैव" इति शीर्षिका रचयित्री डा. एन्.गुणवतीति। परन्तु अस्याः नाम्ना "कार्तिकदीपोत्सवः" इति शीर्षिकाविषयः प्रमादात् प्रचुरितः। "कार्तिकदीपोत्सवः इति शीर्षिका व्यासरचयित्री कुमारी लिङ्गारेड्डि उमामहेश्वरी। अस्याः स्थाने शीर्षिकारचयित्री एन्.गुणवतीति प्रमादात् प्रचुरिताम्। पाठकाः प्रमादात् कृतं नामपरिवर्तनं जानन्तु।

# सत्यधर्मपालिकायाः सत्यवत्याः धार्मिकप्रवृत्तिः



- डा वि.माधवरेड्डि

चरवाणी - ९९४८५२३२५९

सत्यवती दाशराजस्य पोषितपुत्री। आदौ सा सामान्यग्रामीण स्त्रीः। शरीरात् मत्स्यवासनागमनात् मत्स्यगन्धिनीति व्यवह्रियते स्म। सा उपरिचरवसुवीर्यात् शापेन मत्स्याभूत्वा यमुनानदीस्थायाः आद्रिकनाम्न्याः अस्परसः पुत्रीत्वेन जाता। अस्याः योजनगन्धिनीत्यपि नाम वर्तते। इयं कन्यात्वे पराशरमहर्षितः सद्योगर्भं धृत्वा कृष्णद्वैपायनस्य व्यासस्य जन्म ददौ अत एवेयं व्यास माता। शन्तनपत्नी। शन्तनात् चित्राङ्गदः, विचित्रवीर्यः इति पुत्रद्वयं प्रसूतवती। कौरवपाण्डववंशरियोयिं पितामही बभूव। कौरववंशमातेयम्।

सत्यवत्याः शरीरात् मत्स्य गन्धागमनात् कोऽपि तां परिणेतुं उत्सहतेस्म। अनया वेदनया सत्यवती अटवीषु परिभ्रमन्ती कदाचित् पराशरमहर्ष्याश्रमं प्राप। पराशरमहर्षिः महातपश्शाली। पुराणानां विष्णुपुराणमनेनैव विरचितमिति वदन्ति। कटोरतपसा बहुयोगसिद्धीः अवाप। सत्यवतीतः मत्स्यगन्धागमनं मुनितपसः भङ्गमभूदित्यत्यं विषयः अन्यः अस्याः सौन्दर्यात् चलितमनस्कः पराशरः स्वकामं पूरयितु मपृच्छत्। स्वसमागात् महान् विद्वान् जनिष्यतीत्यवोचत्। तदा सत्यवती स्वत्रीन् मनोरथान् यदि पूरयिष्यसि तदा समागममङ्गीकरिष्यामीत्यवोचत्।

**व्यासस्य जननम्** - कदाचित् सत्यवत्या यमुनानद्यां नौकानयन सन्दर्भे पराशरो नाम ज्योतिश्शास्त्रप्रवीणः महामुनिः इमामकामयत। तपोवतां इदमनुचितमिति तया अभ्यन्तरे प्रोक्तेऽपि तच्छ्रुत्वा निग्रहविहीनः तन्मुहूर्तमेव समागमयोग्यमित्युवाच। अतिलोकपरिमलत्वाय तस्याः शरीरस्य, कन्यात्वभङ्गाभावाय मुनिः तस्य वरं ददौ। एवं तयोः सङ्गमकारणात् यमुनानद्यामेकस्मिन् द्वीपे सद्योगर्भात् कन्यात्वभ्रंशेन विना जातपुत्रः एव कृष्णद्वैपायन नामक व्यासः। अयं द्वादशवर्षानन्तररं मातृस्मरणेनैव दर्शनभाग्यं करिष्यामीति प्रमाणं कृत्वा हिमालयं तपसे जगाम। महामुनि वरात् मत्स्यगन्धिनी सा कुत्र गतेति केनापि न पृष्टम्। तस्याः शरीरात् योजनपर्यन्तं सुगन्धागमनात् सा योजनगन्धिनीति व्यवहृता।

पराशरमहर्षेः कामवांछापूराणार्थं स्वस्याः अभिलाषत्रयं पूरणीयमिति मत्स्यगन्धिन्या प्रोक्तम्। तत्र १. आवयोः समागमः पञ्चभूतैरपि न द्रष्टव्यः।

२. एतन्नियमपालनाय महर्षिः आश्रमपरितः कृत्तिमावरोधवस्त्रं ससर्ज। २. कन्यात्वभ्रंशः न भवितव्यः। एतदर्थं मुनिः जननानन्तरं स्वतपोबलेन कन्यात्वं दास्यामीत्यवोचत्।३. स्वशरीरागत मत्स्यगन्धः निवारणीयः। एतदर्थं (9 miles) योजनदूरपर्यन्तं परवाशरः सौगन्ध्यागमन प्रसरणवरं दास्यामीति प्रमाणञ्चकार।

(अनुवर्तते१५)

# तिरुमलतिरुपतिदेवस्थानानि, तिरुपति

## जनवरि - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| | | | | 1 | 2 | 3 |
| 4 | 5 | 6 | 7 | 8 | 9 | 10 |
| 11 | 12 | 13 | 14 | 15 | 16 | 17 |
| 18 | 19 | 20 | 21 | 22 | 23 | 24 |
| 25 | 26 | 27 | 28 | 29 | 30 | 31 |



देवुनिकडपा उभयदेवीभ्यां
श्रीलक्ष्मीवेङ्कटेश्वरस्वामिनः

## फिब्रवरि - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| 1 | 2 | 3 | 4 | 5 | 6 | 7 |
| 8 | 9 | 10 | 11 | 12 | 13 | 14 |
| 15 | 16 | 17 | 18 | 19 | 20 | 21 |
| 22 | 23 | 24 | 25 | 26 | 27 | 28 |

## मार्च् - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| 1 | 2 | 3 | 4 | 5 | 6 | 7 |
| 8 | 9 | 10 | 11 | 12 | 13 | 14 |
| 15 | 16 | 17 | 18 | 19 | 20 | 21 |
| 22 | 23 | 24 | 25 | 26 | 27 | 28 |
| 29 | 30 | 31 | | | | |

### जनवरि - 2026

०१. आङ्ग्लसंवत्सरारम्भः
०४. तिरुमलस्थ श्रीस्वामिनः प्रणयकलहमहोत्सवः
०७-१३. आण्डाल् नीराट्टोत्सवः
१४. भोगि
१५. मकरसङ्क्रान्तिः
१६. कनुम, श्रीगोदादेवीपरिणयोत्सवः
१८ तः फिब्रवरि १० पर्यन्तम्
तिरुपतिस्थ गोविन्दराजस्वामिनः अध्ययनोत्सवः
१९-२७ देवुनिकडपा श्रीलक्ष्मीवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः
२३. वसन्तपञ्चमी
२५. रथसप्तमी
२६. गणतन्त्रदिनोत्सवः
२९. भीष्मैकादशी

### फिब्रवरि - 2026

०१. श्रीरामकृष्णतीर्थमुक्कोटि
०६. कुरत्ताल्वारु वर्षतिरुनक्षत्रम्
०८-१६. श्रीनिवासमङ्गापुरम्
श्रीकल्याणवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः
०८-१७. पर्यन्तम् तिरुपति कपिलेश्वरस्वामिनः
ब्रह्मोत्सवः
१५. महाशिवरात्रिः
२४ तः मार्च् ०४ पर्यन्तम् पर्यन्तम् - तरिगोण्ड
श्रीलक्ष्मीनरसिंहस्वामिनः ब्रह्मोत्सवः
२६ तः मार्च् ०२ पर्यन्तम् तिरुमलक्षेत्रे प्लवोत्सवः
२८ कुलशेखर आल्वारु वर्षतिरुनक्षत्रम्

### मार्च् - 2026

०३. कुमारधारतीर्थमुक्कोटि, श्री लक्ष्मीजयन्ती
१५. अन्नमाचार्य वर्धन्ती, श्रीनिवासमङ्गापुरम्,
श्रीकल्याणवेङ्कटेश्वरस्वामिनः पुष्पयागः
१७-२५ तिरुपतिस्थ श्रीकोदन्डरामस्वामिनः
ब्रह्मोत्सवः
१९. 'श्रीपराभव' तेलुगु नूतन वर्ष युगादि
२१. मत्स्य जयन्ती
२३. श्रीपञ्चमी
२४ तः एप्रेल् ०१ पर्यन्तम् वालपाडु,
श्रीपट्टाभिरामस्वामिनः ब्रह्मोत्सवः
२४-२८ नागुलापुरम्, श्रीवेदनारायणस्वामिनः
प्लवोत्सवः तथा सूर्य पूजा
२६तः एप्रेल् ०३ ओण्टिमिट्ट
श्री कोदण्डरामस्वामिनः ब्रह्मोत्सवः
२७. श्रीरामनवमी
३० तः एप्रेल् ०१. तिरुमल, श्रीस्वामिनः वसन्तोत्सवः,
श्रीकोदण्डरामस्वामिनः प्लवोत्सवः

## तिरुमलतिरुपतिदेवस्थानानि, तिरुपति



नागुलापुरम् उभयदेवीभ्यां
वेदनारायणस्वामी

### एप्रेल् - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| | | | 1 | 2 | 3 | 4 |
| 5 | 6 | 7 | 8 | 9 | 10 | 11 |
| 12 | 13 | 14 | 15 | 16 | 17 | 18 |
| 19 | 20 | 21 | 22 | 23 | 24 | 25 |
| 26 | 27 | 28 | 29 | 30 | | |

### मे - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| 31 | | | | | 1 | 2 |
| 3 | 4 | 5 | 6 | 7 | 8 | 9 |
| 10 | 11 | 12 | 13 | 14 | 15 | 16 |
| 17 | 18 | 19 | 20 | 21 | 22 | 23 |
| 24 | 25 | 26 | 27 | 28 | 29 | 30 |

### जून् - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 |
| 7 | 8 | 9 | 10 | 11 | 12 | 13 |
| 14 | 15 | 16 | 17 | 18 | 19 | 20 |
| 21 | 22 | 23 | 24 | 25 | 26 | 27 |
| 28 | 29 | 30 | | | | |

### एप्रेल् - 2026

०१. तुम्बुरुतीर्थमुक्कोटि
०२. वायल्पाडु, श्रीपट्टाभिरामस्वामिनः पुष्पयागः
०४. ओण्टिमिट्ट श्रीकोदण्डरामस्वामिनः पुष्पयागः
१४. तमिळनूतनवर्षारम्भः
२०. श्रीपरशुरामजयन्ती, अक्षयतृतीया,
२१ श्रीशङ्करजयन्ती
२२. श्रीरामानुजजयन्ती
२३. श्रीरामजयन्ती, तिरुपतिस्थ श्रीकोदण्डरामस्वामिनः पुष्पयागः
२५-२७. तिरुमल श्रीपद्मावतीश्रीनिवासपरिणयमहोत्सवः
२८ तः मे ०१ पर्यन्तम् तिरुचानूरु श्रीपद्मावतीदेव्याः वसन्तोत्सवः
३०. श्रीनरसिंहजयन्ती, तरिगोण्ड वेङ्गमाम्बाजयन्ती

### मे - 2026

०१ मे डे, तिरुपतिस्थ श्रीकपिलेश्वरस्वामिनः पत्रपुष्पयागः , कूर्मजयन्ती
०१-०९. नागुलापुरम् श्रीवेदनारायणस्वामिनः ब्रह्मोत्सवः
०२. श्रीअन्नमाचार्यजयन्ती
०७-०९. श्रीकल्याणवेङ्कटेश्वरस्वामिनः वसन्तोत्सवः, श्रीनिवासमङ्गापुरम्
०५-१२ तिरुपति गङ्गाजातर
१२. श्रीहनुमज्जयन्ती
२३-३१. तिरुपतिस्थ श्रीगोविन्दराजस्वामिनः ब्रह्मोत्सवः
२८ तः जून् ०५ हृषीकेष्/नारायणवनम् श्रीकल्याणवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः

### जून् - 2026

०२-१३. यमुनानद्याः पुष्करः
०५. नागुलापुरम् श्रीवेदनारायणस्वामिनः पुष्पयागः
०६-१४. कार्वेटिनगरम् श्रीवेणुगोपालस्वामिनः ब्रह्मोत्सवः
१५. कार्वेटिनगरम् श्रीवेणुगोपालस्वामिनः पुष्पयागः
२२. तिरुपतिस्थ श्रीगोविन्दराजस्वामिनः पुष्पयागः
२५-२९. तिरुचानूर श्रीपद्मावतीदेव्याः प्लवोत्सवः
२५तः जूलै ०३ पर्यन्तम् अप्पलायगुण्ट, श्रीप्रसन्नवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः
२६-२८. तिरुमल श्रीस्वामिनः ज्येष्ठाभिषेकः

# तिरुमलतिरुपतिदेवस्थानानि, तिरुपति

## जूलै - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| | | | 1 | 2 | 3 | 4 |
| 5 | 6 | 7 | 8 | 9 | 10 | 11 |
| 12 | 13 | 14 | 15 | 16 | 17 | 18 |
| 19 | 20 | 21 | 22 | 23 | 24 | 25 |
| 26 | 27 | 28 | 29 | 30 | 31 | |




## आगस्ट् - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| 30 | 31 | | | | | 1 |
| 2 | 3 | 4 | 5 | 6 | 7 | 8 |
| 9 | 10 | 11 | 12 | 13 | 14 | 15 |
| 16 | 17 | 18 | 19 | 20 | 21 | 22 |
| 23 | 24 | 25 | 26 | 27 | 28 | 29 |

## सेप्टेम्बर् - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| | | 1 | 2 | 3 | 4 | 5 |
| 6 | 7 | 8 | 9 | 10 | 11 | 12 |
| 13 | 14 | 15 | 16 | 17 | 18 | 19 |
| 20 | 21 | 22 | 23 | 24 | 25 | 26 |
| 27 | 28 | 29 | 30 | | | |

### जूलै - 2026

०५-०७. तिरुचानूरु श्रीसुन्दरराजस्वामिनः अवतारोत्सवः
१६. जगन्नाथ रथयात्रा
१७. तिरुमलक्षेत्रे स्वामिनः आणिवर आस्थानम्
१७-१९. श्रीनिवासमङ्गापुरम् श्रीकल्याणवेङ्कटेश्वरस्वामिनः साक्षात्कारवैभवोत्सवः
२४-२६. तिरुपतिस्थ श्रीगोविन्दराजस्वामिनः ज्येष्ठाभिषेकः
२५. प्रथमैकादशी
२५-२८. तिरुपति, श्री कपिलेश्वरस्वामिनः पवित्रोत्सवः
२९. गुरुपूर्णिमा, व्यासजयन्ती
३०. अप्पलायगुण्ट श्रीप्रसन्नवेङ्कटेश्वरस्वामिनः पुष्पयागः

### आगस्ट् - 2026

०७. आडिकृत्तिका
०७-१०. तिरुपतिस्थ श्रीकोदण्डरामस्वामिनः पवित्रोत्सवः
१२. चक्रत्ताल्वारु वर्षतिरुनक्षत्रम्
१५. स्वातन्त्र्यदिवसः
१६. नागचतुर्थी
१७. गरुडपञ्चमी
२१. मातृश्री तरिगोण्ड वेङ्गमाम्बावर्धन्ती श्रीवरलक्ष्मीव्रतम्
२२-२५. तिरुमल श्रीस्वामिनः पवित्रोत्सवः
२५-२७. श्रीकार्वेटिनगरम् श्रीवेणुगोपालस्वामिनः प्लवोत्सवः
२८. श्रीहयग्रीवजयन्ती, श्रीविखनसमहामुनिजयन्ती, श्रावणपुर्णिमा, जन्द्यालपुर्णिमा
२९. गायित्रीजपः

### सेप्टेम्बर् - 2026

०४. श्रीकृष्णजन्माष्टमी, गोकुलाष्टमी
१५. कार्वेटिनगरम् श्रीवेणुगोपालस्वामिनः पवित्रोत्सवः
१३. श्रीबलरामजयन्ती, श्रीवराहजयन्ती
१४-२३. तिरुमल श्रीवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः
१४. विनायकचतुर्थी
१९. तिरुमल श्रीस्वामिनः गरुडसेवा
२१-२४. तिरुपतिस्थ श्रीगोविन्दराजस्वामिनः पवित्रोत्सवः
२३-२६. तिरूचानूरु, श्रीपद्मावतीमातुः पवित्रोत्सवः
२३ वामन जयन्ती
२४. तिरुमल श्रीस्वामिनः बाक्सवारी उत्सवः
२५. अनन्तपद्मनाभव्रतम्

# तिरुमलतिरुपतिदेवस्थानानि, तिरुपति




## अक्टोबर् - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| | | | | 1 | 2 | 3 |
| 4 | 5 | 6 | 7 | 8 | 9 | 10 |
| 11 | 12 | 13 | 14 | 15 | 16 | 17 |
| 18 | 19 | 20 | 21 | 22 | 23 | 24 |
| 25 | 26 | 27 | 28 | 29 | 30 | 31 |

## नवम्बर् - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| 1 | 2 | 3 | 4 | 5 | 6 | 7 |
| 8 | 9 | 10 | 11 | 12 | 13 | 14 |
| 15 | 16 | 17 | 18 | 19 | 20 | 21 |
| 22 | 23 | 24 | 25 | 26 | 27 | 28 |
| 29 | 30 | | | | | |

## डिसेम्बर् - 2026

| भानु | इन्दु | भौम | सौम्य | गुरु | भृगु | मन्द |
|---|---|---|---|---|---|---|
| | | 1 | 2 | 3 | 4 | 5 |
| 6 | 7 | 8 | 9 | 10 | 11 | 12 |
| 13 | 14 | 15 | 16 | 17 | 18 | 19 |
| 20 | 21 | 22 | 23 | 24 | 25 | 26 |
| 27 | 28 | 29 | 30 | 31 | | |

### अक्टोबर् - 2026

०२. गान्धी जयन्ती
१०. महालय अमावास्या
११-२०. तिरुमल श्रीवेङ्कटेश्वरस्वामिनः नवरात्रि ब्रह्मोत्सवः
१२-२० तिरुचानूरु श्रीपद्मावतीदेव्याः नवरात्रि-उत्सवः
१६. तिरुमलश्रीस्वामिनः नवरात्रि गरुडसेवा
१७. तिरुमल श्रीवेङ्कटेश्वरस्वामिनः पुष्पकविमानम्, सरस्वातीपूजा
१९. दुर्गाष्टमी, महर्नवमी
२०. विजयदशमी
२६. तिरुपतिस्थ श्रीकपिलेश्वरस्वामिनः अन्नाभिषेकः

### नवम्बर् - 2026

०४-०७. श्रीनिवासमङ्गापुरम्, श्रीकल्याणवेङ्कटेश्वरस्वामिनः पवित्रोत्सवः
०८. नरकचतुर्दशी, दीपावली
०९. श्रीकेदारगौरीव्रतम्
१३. नागचतुर्थी
१४. बालकदिनोत्सवः
१५. तिरुमलक्षेत्रे स्वामिनः पुष्पयागः
२१. कैशिकद्वादशी, श्रीचक्रतीर्थमुक्कोटि
२४. तिरुपति श्रीकपिलेश्वरस्वाम्यालये कृत्तिकादीपोत्सवः, श्रीकपिलतीर्थमुकोटि, तिरुमल आलयस्य कृत्तिकादीपोत्सवः
२७. तिरुपतिस्थ, कपिलेश्वरस्वाम्यालये लक्षबिल्वार्चनम्

### डिसेम्बर् - 2026

०५-१४. तिरुचानूरु श्रीपद्मावतीदेव्याः ब्रह्मोत्सवः
०६. श्रीधन्वन्तरि जयन्ती
०९. तिरुमलस्थ स्वाम्यलये अध्ययनोत्सवप्रारम्भः
१०. तिरुचानूरु श्रीपद्मावतीदेव्याः गजवाहनोत्सवः
१४. तिरुचानूरु श्रीपद्मावतीदेव्याः पञ्चमीतीर्थम्
१५. तिरुचानूरु श्रीपद्मावतीदेव्याः पुष्पयागः
१६. धनुर्मासारम्भः
१९-२३. तिरुपति श्रीकपिलेश्वरस्वामिनः प्लवोत्सवप्रारम्भः
२०. वैकुण्ठैकादशी, गीताजयन्ती
२१. तिरुमल श्रीस्वामिपुष्करिणीतीर्थमुक्कोटि
२३. श्रीदत्तजयन्ती,

# सत्यवत्याःसत्यधर्मपालिकायाः धार्मिकप्रवृत्तिः

- डा वि.माधवरेड्डि, चरवाणी -९९४८५२३२५९

एतत्त्रयनियमाङ्गीकारादेव महर्षेः कामवांछां सा पूरितवती। द्वयोः समागमात् वेदव्यासः अजायत। महर्षिः तस्याः अन्याभिलाषानपि पूरयामास। कदाचित् शन्तनस्य गङ्गीतीरगमनसमये शंतननासिकापुटयोः अद्भुत परिमलागन्धस्पर्शत् परिमलागमन मूलं अन्विषन् शंतनः सत्यवती मपश्यत्। तत्सौन्दर्यमुग्धः शन्तनः तदेव तां गान्धर्वविधिना पर्यणैषीत्।

देवव्रतः भीष्मः गाङ्गेयनामकपुत्रं हस्तिनापुरस्य राज्ञे शन्तनाय ददौ। गङ्गा तं परित्यज्य गता। पश्चात् गङ्गातीरे मृगयार्थं गतः शन्तनः सत्यवतीं दृष्ट्वा मोहपरवशः आसीत्। तस्याः पितरं दाशराजं मिलित्वा तत्पुत्र्या मम विवाहः कर्तव्यः इत्यपृच्छत्।

इतः पूर्वमेव राज्ञः पुत्रः भीष्मः भवतीति स्वपुत्री सन्तानस्यैव राज्याधिपत्यं देयमिति नियमं पालनीयमिति दाशराजः शन्तनमपृच्छत्। ज्ञातविषयः गङ्गापुत्रः देवव्रतः दाशराजं समीप्य अहमाजन्मान्तं ब्रह्मचारीत्वेनैव भविष्यामीति तद्वारा स्वस्य वा सन्तानस्य वा सत्यवतीपुत्रैः राज्यार्थंस्पर्था समस्या न स्यादिति भीषणप्रतिज्ञां चकार। अत एव तं भीष्मः इति वदन्ति। सत्यवती स्वस्य मातृमूर्तित्वेन भवितुं अनुग्रहः देयः इति अभ्यर्थयामास। भीष्मः सत्यवतीं मान्यतया नीत्वा स्वपित्रा तस्याः विवाहं कारयामास।

सत्यवती शन्तनयोः चित्राङ्गद विचित्र वीर्यनामकौ पुत्रौ जातौ। शन्तनमरणानन्तरं चित्राङ्गदः राजा बभूव। परन्तु गन्धर्वैः युद्धे सः अम्रियत। पश्चात् भीष्मः विचित्रवीर्यं राजानं चकार। तस्मिन्नेव समये काशीराजः होत्रवाहनः विवाहविषये तनया त्रयार्थं स्वयंवरं प्रकटीचकार। परन्तु भीष्मस्य आह्वानं नागतम्। अतः भीष्मः काशी राज्ये दण्डयात्राञ्चकार। काशीराजः तेन युद्धंकर्तुमसमर्थः जातः। काशी राजस्य अग्रतनयायां प्रेमपतितः साल्वराजः अपि स्वयवरपराङ्नुखः बभूव। भीष्मः स्वयं काशी राजस्य पुत्रिकात्रयं हस्तिन नगरमानीय विचित्रवीर्येण विवाहः करणीयः इत्यमन्यत। काशीराजस्य अग्रिमपुत्र्या अम्बया साल्वराजस्य विवाहविश्चयः अभूदिति तस्याः पुनर्विवाहः अनुचितः इति पण्डितैरुक्तत्वात् भीष्मः तां साल्वराज सकाशं प्रेषयामास। साल्वराजः भीष्मेन युद्धं कृत्वा तां न प्राप्तोऽस्मीति तां पत्नीत्वेन अङ्गीकर्तुं तिरश्चकार। अतः त्वयैव मां पत्नीत्वेन अङ्गीकर्तव्यः इति अम्बा प्रोवाच। भीष्मः अहं यावज्जीवं ब्रह्मचारीति मातुः वाग्दानं कृतोऽस्मि। नाहं विवाहमङ्गी करिष्यामीत्यवोचत्। अतः कुपिता अम्बा स्वजीवितनाशकं भीष्मं युद्धे जेष्यामीति शपथञ्चकार। पश्चात् सा तपः कर्तुं हिमालयं ययौ। तत्तपसः तुष्टः शिवः प्रत्यक्षीभूय आगामिजन्मनि त्वं द्रुपदराजस्य शिखण्डिनाम्ना जन्म गृहीत्वा युद्धे भीष्मं पराजितं करिष्यसीति वरं ददौ। तदा सा अग्निं प्रज्वाल्य तदग्नौ स्वशरीरं दग्धं कृतवती। कामलालसः विचित्र वीर्यः अनारोग्येन अम्रियत। पुत्रद्वय मरणानन्तरं वंशपरिरक्षणार्थं भीष्मं पट्टभिषेकाय सत्यवती प्रार्थितवती। भीष्मः प्रतिज्ञा भङ्गो भवेदिति नाङ्गीचकार। देवरन्यामनुसृत्य प्रज्ञावतां महतामनुमत्या उत्तम ब्राह्मणैः अम्बिकारम्बालिकयोः आघानं विर्वाह्य वंशरक्षणं कर्तुमवकाशः वर्तते इति भीष्मः सूचयामास। तदा सत्यवती स्वविवाहपूर्ववृत्तान्तं भीष्मस्य उक्त्वा सद्योगर्भजात व्यासेन अम्बिकाम्बालिकयोः आधानं करणीयमिति भीष्ममपृच्छत्। व्यासनामश्रवणादेव भीष्मः तस्यै नमश्चकार। स्व माता गङ्गादेवी सत्यवत्यपि पवित्रमूर्तिरिति तां प्राशशंस। अस्माकं वंशः पवित्रः इति प्रोवाच। ततः सत्यवती व्यासं स्मृत्वा स्वावसरं विशदीचकार। व्यासः मात्राज्ञां शिरसाधृत्वा कुरुवंशस्थिरत्वाय सिद्धः सञ्जातः। सत्यवती स्नुषां अम्बिका मम्बालिकाञ्च देवरन्यायप्रकारं धर्मसम्मततया सन्तान प्रप्तेः अङ्गीकृते कृत्वा मार्गं सुगमञ्चकार। अम्बिका व्यासं दृष्ट्वा नयने निमीलितवती। अतः जनुषान्धः धृतराष्ट्रः अजयत। अम्बालिका व्यासदर्शनात् कम्पित शरीरा जाता। अतः पाण्डुरोगेण पाण्डराजः अजायत। सत्यवती सद्वारसत्वाच व्यासं पुनः प्रार्थयामासा भीष्मः अङ्गीकृत्य अम्बालिकयै सन्तानार्थं मङ्गीचकार। दीर्घचिबुकव्यासेन सम्भोगार्थमनिच्छन्ती अम्बालिका स्वदासीं तत्समागमं प्राप्तु प्रेषितवती। सा महा सन्तोषेण व्यासस्य सम्भोगसुखं ददौ तत्फलतया विदुरः महाज्ञानी अजायत। एवं कुरुवंशपितामही सत्यवती स्वाभिलाषान् सफलान् कृत्वा धन्यजीविनी महाभारतकथायाः प्राणान् दत्तवती। महाभारतं पञ्चमोवेदः इत ख्यतेश्च मूलहेतुभूता बभूव।

धर्मो रक्षति रक्षितः

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः।।

# त्यागराजस्वाम्याराधनम्



- आचार्य जि.पद्मनाभम्                चरवाणी -९२४७३२८२८६

तञ्जावूरुमण्डलकावेरी नदीतटस्थ तिरुवायूर नामक ग्रामे प्रसिद्धवाग्गेयकारः त्यागराज जन्म लेभे। त्यागय्यस्य पिता रामब्रह्मा माता सीतम्मा। रामब्रह्मणः त्रिषुपुत्रेषु एकः जपेशः, द्वितीयस्य नाम रामनाथः। तिरुवाय्यूरुस्वामी त्यागराजः स्वप्नसाक्षात्कृतः त्यागराजस्वामी रामब्रह्मणः सङ्गीतसाहित्य निष्णातपुत्रः जनिष्यतीति स्वप्ने साक्षात्कृतः अवोचत्। सर्व जिन्नामसंवत्सर वैशाखमास षष्ट्यां (४-५-१७६७) सीतम्मा पुत्रं सुषुवे। त्यागय्यः पण्डितवंशे जातः। त्यागराजः बाल्यादेव पितृकृतरामपूजायामासक्तः पूजागृहसमीपे उपविश्य पितुः आवश्यकपूजाद्रव्याणि ददाति स्म। पुरन्दरदासकीर्तनेषु जयदेवाष्टपदेषु अनुरक्तः तन्मयत्वं प्राप्नोति स्म। सप्तवर्षेषु उपनयनं प्राप्य पितृतः विद्याभ्यासं प्राप्य पुनीतः नमो नमो राघवाय इति दिव्यसङ्कीर्तनगानञ्चकार। त्यागय्येन भित्तिकायां लिखितसङ्गीत कीर्तनानि दृष्ट्वा पण्डिताः तस्य सङ्गीत शिक्षां दातुं पितुः सूचयामासुः।

**शोण्टिवेङ्कटरमणय्य शिष्यत्वम् -** सङ्गीत पाठबोधकः प्रसिद्ध सङ्गीत विद्वान् शोण्टिवेङ्कटरमणय्यः तिरुवैयरुग्रामे आसीत्। पिता पुत्रस्य ''शोण्टिवेङ्कटरमणय्य सङ्गीताध्यापनं श्रुत्वा त्यागय्यमपि शोण्टिवेङ्कटरमणय्यशिष्यञ्चकार।

**विद्वत्सभा -** कदाचित् शोण्टिवेङ्कटरमणय्येन विद्वात्समा आयोजिता। प्रसिद्धगायकाः विद्वत्सभामागताः। गुरुः त्यागय्यमपि गातुमादिदेश। त्यागय्यः गुरुमभिवन्द्य बिलहरिरागेण ''दोरकुना इटुवण्टिसेव'' इति गानञ्चकार। तत्कीर्तनसाहित्यं गान पद्धतिश्च सर्वान्मुग्धान् चकार। प्रसिद्धगायकाः शोण्टिरमणय्यं त्यागय्यञ्च प्राशशंसुः। तदा पादनमस्कारं कुर्वन्तं शिष्यं त्यागय्यं उत्थाप्य आलिङ्ग्य ''दोरकुना इटुवण्टि शिष्युडु'' इति आनन्दबाष्पानि तत्याज। तञ्जावूरुमहाराजदत्तबहुमतीरपि शिष्याय सादरं ददौ।

**मधुरगानेन दीपप्रज्वलनम् -** कदाचित् पुदुक्कोटैसंस्थानाधिपतिः रामचन्द्रतोण्डमानर् सभायां दीपस्तम्भं संस्थाप्य तैलार्द्रवर्तिकाः दीपाराधनस्थाले निक्षिप्य यदि सङ्गीतस्य दिव्य शक्तिः स्यात् गायकानां समार्थ्यं यदि स्यात् गानेन दीपप्रज्वलनं कार्यमित्यादिदेश। त्यागय्यः सर्वान् नमस्कृत्य ज्योतिस्वरूपिणी रागे अगायत। गीतासमाप्तौ दीपः प्रज्वाल्यमानः आसीत्। त्यागय्यं उचितरीत्या सम्भावयामास बाल्यवयस्कः त्यागराजः गुरोः सकाशात् सर्वमधीतवान्। त्यागय्यस्य मातुलः वीणकालहस्तय्यः त्यागय्यस्य गृहे बहु सङ्गीतग्रन्थान् परिशील्य बहुसन्देहनिमग्नः आसीत्।

**नारदानुग्रहः -** कदाचित् साक्षान्नारदमहर्षिः सन्न्यासिरूपे त्यागय्यगृहमागत्य आतिथ्यं स्वीकर्तुमङ्गीकृत्य कानिचित्पुस्तकानि तत्र निवेश्य कावेरीनद्यां स्नानमाचर्य आगमिष्यामीत्यवोचत्। रात्रिरप्यतीता। सन्न्यासी नागतः। त्यागय्यः रामनामस्मरणं कुर्वन् निद्रापरवशः आसीत्। स्वप्ने नारदः सन्दृष्टः अहं सन्न्यासिरूपेण त्वद्गृहमागतः। त्वं अवतारपुरुषः। तव सन्देहपरिहारार्थं सङ्गीतग्रन्थान् तव गृहे निक्षिप्तोऽस्मि। तान् ग्रन्थान् पठित्वा सन्देहनिवृत्तिं कुरु इत्युक्त्वा अन्तर्दधौ। जागृतः त्यागय्यः ग्रन्थसञ्चिकां उद्घाट्य स्वरार्णवः नारदीयमिति ग्रन्थौ ददर्श। पश्चात् तद्ग्रन्थसाहाय्यात् सङ्गीते निवृत्तसंशयः परमानन्दभरितः आसीत्। ततः स्वसन्देहपरिहारकं नारदं ''राजिल्लवीणकल्गुगुरुराय'' नारदनाद सरसीरुह शृङ्गशुभाङ्ग श्रीत्यागराजनुत श्रीरामां पालय'' इति

वर नारदनारायण स्मरणानन्दानुभवमृगाक्तशरदिन्दु विभाव घनाघने सारमुगानुब्रोवुमिक'' इति बहुकीर्तनैः तुष्टाव।

**मन्त्रोपदेशः -** उंछवृत्तिः भिक्षटनं न भवति। इहलोकबन्धून् नियमितुं साधनभूता उंछवृत्तिः। त्यागय्यः उंछवृत्तिः भगवदनुग्रहप्राप्तेति सम्भाव्य उंछवृत्तिजीवनयापकेभ्यः पादपूजां कुर्वन् पात्रपूर्णधान्यं दानं करोति स्म। सन्न्यासी त्यागराज गुणसम्पत्त्या आकृष्टः एवमवोचत् ''त्वं ९६ कोटिपर्यन्तं राम नाम जपं कुरु, सकलसौभाग्य प्राप्तिः रामानुग्रहश्च सिद्ध्येदिति उपदिश्य आशीर्ददौ।

**तारकमन्त्रसिद्धः -** तिरुवय्यूरुक्षेत्रे पञ्चनदीश्वरदेवालये दक्षिणकैलासमण्टपे मध्याह्नवेलायां त्यागय्य रामतारकमन्त्रजपं प्रारेभे। ३८ वर्षावधावेव ९६ कोटिसख्याराम नामजपं पुनश्च रणं चकार। सर्वं राममयं पश्यन् बालमोहनरूप रामं प्रत्यक्षं ददर्श। दिव्यतेजसा त्यागय्यस्य मुखारविन्दं प्रकाशमानमभूत्।

**जीवनोपाधिः -** त्यागय्यपूर्वीकाः राजाश्रयेण जीवनं यापयन्ति स्म। त्यागय्य राजाश्रयं परित्यज्य तम्बूरां हस्ते गृहीत्वा शिष्यपरिवृतः रामनामसङ्कीर्तनं कुर्वन् गृहस्थैः प्रीत्या समर्प्यमान सम्भारैः गृहमागत्य देवतार्चनानन्तरं भोजनं स्वीकरोति स्म। उंछवृत्तिं सप्ताहे एकवारमेव अवलम्बतेस्म। त्यागय्यस्य सोदरः जपेशः त्यागय्यस्य सङ्गीतसाहित्यैः राजानं सन्तोषयित्वा धनकनकवास्तुवाहनानि प्राप्य सुखजीवनाय प्रोत्साहयतिस्म। त्यागय्यः तदालोचनां तिरस्करोतिस्म। त्यागय्यस्य गानप्रशस्तिः तञ्जावूरुमहाराजकर्णे पतिता। राज्ञः आन्तरङ्गिकाः त्यागराज सकाशमागत्य राजत्सन्निधौ प्रभुप्रशंसया कीर्तने कृते दशप्रकरां परिमाणभूमिं राजा दास्यतीति प्रलोभयासासुः। त्यागय्यः तदनिच्छन् ''निधिचालसुखमा रामुनिसन्निधि सेवसुखामा - निजमुतेलुपुमु मनसा'' इति पृष्ट्वा शरभोजिप्रेषित बहुमतीः तिरश्चकार। जपेशय्यस्य आशा व्यर्था जाता।

**शरभोजिदुराग्रहः -** त्यागय्यस्य तिरस्कारः शरभोजिमहाराजाय श्रावितः। सः त्यागय्यं बद्ध्वा आनयत इति राजभटानादिदेश। प्रस्थितेषु राजभठेषु शरभोजि महाराजः उदरबाधापीडितः आसीत्। सिद्धवैद्यप्रयत्नाः अपि निष्फला अभूवन्। ज्योतिष्काः शरभोजिजातकचक्रं परिशील्य राज्ञा महापुरुषे अपचारः कृतः। तत्फलतया उदरबाधेत्यवोचन्। शरभोजिमहाराजस्य तृतीयामात्यः अण्णाय्यं गारु त्यागराजे अनुचित प्रवर्तनादेवं जातमिति तिरुवैयूरुनगरं प्रस्थाय त्यागय्यं समीप्य महाराजा



नारोग्यंमधिकृत्य निवेदमामास। त्यागय्यः अपि करुणार्द्रहृदयः तुलसीतीर्थं राज्ञा स्वीकृतश्चेत् उदरबाधानिवृत्तिः रामानुग्रहात् स्यादित्यवोचत्। अमात्यः अण्णाय्यं गारु अन्तः पुरं प्रविश्य तुलसीदलतीर्थं राज्ञे ददौ। वारत्रयं तुलसीतीर्थ स्वीकरणोदेव शरभोजमहाराजोदरबाधा उपशमिता आसीत्। ततः आत्मापराधं क्षमस्वेति राजा त्यागराजं प्रार्थयामास। तदा प्रभृति त्यागराज कृतैकादशीभजनानि स्वयं पश्यन् आचरन् राजा स्वजन्मसार्थकञ्चकार।

**श्रीरामविग्रहादृश्यता -** त्यागय्यः निरन्तरं रामपूजा निमग्नः विग्रहाराधने सर्वस्वं विस्मरतिस्म। उदरपोषणार्थं त्यागय्य रामभक्तिः निष्फलेति जपेशय्यः रामविग्रहान् कावेरी नद्यां पातयामास। विग्रहादर्शनात् निद्राहारान् परित्यज्य रामनामजप निमग्नस्य त्यागय्यस्य श्रीरामः स्वप्ने दृष्टः कावेरीघट्टे विग्रहाः वर्तन्ते इत्यवोचत्। त्यागय्यः कावेरीं गत्वा श्रीरामसूचित प्रदेशे विग्रहान् दृष्ट्वा ''कनुगोण्टिनि श्रीरामुनिनेडु'' इति कीर्तनां जगौ। जपेशय्यः पापफलितमनु बभूव। जपेशय्यस्य पुत्रः रामः क्रीडन् कावेरीनद्यां पपात। जपेशय्यः पुत्रमरणात् महाव्याधिग्रस्तः आसीत्। तदा क्रोधरहितः त्यागय्यः श्रीरामचन्द्रमुद्दिश्य'' रामचन्द्र। अहं कदापि स्वार्थपूरणाय अयाचम्। कृतदोषान् क्षमस्व मत्सोदरं स्वस्थंकुरु ''एन्नोतप्पुलुचेसिनवारिनि राजन्य! नीवु ब्रोचिनावु'' इति कीर्तनं जगौ। झटिति जपेशय्यः व्याधिदूरः त्यागय्यं आलिङ्ग्य स्वयमपि रामभक्तिसाम्राज्ये दासः अभवत्।

त्यागय्यस्य द्वितीयपत्नी कमलाम्बासुतायाः सीतालक्ष्म्याः युक्तवयसि कुप्पुस्वामुच्येन विवाहः शिष्यसाहाय्यात् वैभवोपेततया निर्वाहितः। त्यागय्यः श्रीरामकृतज्ञतया ''ननुपालिम्पवच्चितिवो'' इति कीर्तनं जगौ।

**यात्राविशेषाः -** त्यागय्यः काञ्चीनगरे पितुः सहपाठिनः उपनिषद्ब्रह्मणः आतिथ्यं स्वीकृत्य ततः क्षेत्रस्थैकाम्रनाथ स्वामिनं कामाक्षोदेवीं वरदराजस्वामिनं दृष्ट्वा भक्त्यावेशतया बहुकीर्तनानि जगौ।

**तेरतीयगरादा -** त्यागय्यः तिरुपतिक्षेत्रे पुष्परिणी स्नानानन्तरं देवालायं प्राविशत्। मध्याह्ण स्वामिसेवानिमित्तपूजानिर्वाहकाः वेङ्कटेश्वराच्छादनतया आच्छादनवस्त्रं तेर) निवेशयामासुः। त्यागय्यस्य स्वामि दर्शनं नाभूत्। तदा बाधायुतः आवेदनया ''तेरतीयगरादा नालोनि तिरुपति वेङ्कटरमणमच्छरमनु कीर्तनं जगौ। गानानन्तरमेव सर्वाश्चर्यजनकतया आच्छादनवस्त्रं दूरं गतम्। स्वामिदिव्यानुग्रहात् सन्तुष्टः त्यागय्यः ''वेङ्कटेश निन्नु...''इति कीर्तनं जगौ।

**शेषय्यस्य प्राणदानम् -** कश्चिद्यात्रिकः रात्रौ भार्यापुत्रैः सह आगच्छन् चोरभीतः देवालयभित्तिमुल्लंघयन् प्रमादात् कूपौ। पतित्वा मरणमवाप। त्यागय्यः तद्दृश्यं दृष्ट्वा कण्ठे तस्य तुलसीमालात्वात् विष्णु भक्तः इति ''नाजीवनाधार'' इति कीर्तनं गातुं शिष्यानादिदेश। गानान्तरं तुलसीतीर्थं शवे पातयामास। निद्रोत्थितः इव यात्रिकः शेषय्यः उत्थाय जन्म प्रदातुः त्यागय्यस्य पादपतितः आसीत्।

**तिरुवोत्तियरुसन्दर्शनम् -** त्यागय्यः तिरुवोत्तियारुक्षेत्रे वीणाकुप्पय्य गृहे वडिवुडेमातुरमुद्दिश्य पञ्चरत्नकीर्तनानि कोवूरुपुण्यक्षेत्रे सुन्दरेश्वरमधिकृत्य पञ्चरत्नानि जगौ।

रामलक्ष्मणयोः बाणवर्षः - तिरुवय्यूरुक्षेत्र प्रतिनिवर्तने अटवीमार्गे श्रीरामनवम्युत्सव निर्वहणधने भक्तेन प्रदत्ते प्रायाणे चोरावृतः त्यागय्यः रामं ध्यायन् ''मुन्दु वेनुक दूरप्रक्कलतोडैमुरासुरहर रारा'' इति कीर्तयामास। झटित्येव द्वौ युवानौ प्रत्यक्षीभूतौ चोरेषु बाणवर्षं वर्षापायामासुः। ततः चोराः त्यगय्यं समीप्य क्षमाभिक्षां प्रार्थयित्वा त्यागय्यात् राममन्त्रोपदेशं प्रापुः।

त्यागय्यः तदा तदा आश्रित शिष्यवात्सल्यं प्रदर्श्य तेषां कीर्तनानि प्रशंसति स्म।

**रचना : -** वाल्मीकिरिव त्यागय्यः अपि २४००० कीर्तनानि व्यरचीदिति वदन्ति। मुद्रित पुस्तकेषु ६६० कीर्तनान्येव लभ्यन्ते। प्रह्लादभक्तविजयः इति नाटकं, नौकाचरित्रमितिगेयनाटकं सीतारामविजयमिति नाटकं त्यागय्यः व्यरचीत्। त्यागय्येन २०० रागभेदाः प्रोक्ताः इति महतां वचनम्।

वाग्गेयकारः त्यागय्यः केवलं भक्तेः प्रामुख्यं दत्वा आवेशात्मक कीर्तनानि विरचितवान्। परन्तु घनराग पञ्चरत्नकीर्तनानां विशेष प्रचारः आगतः।

१. **नाटरागः -** आदितालम् - जगदान्दकारक जय जानकीप्राण नायक

२. **सौलिरागः -** आदितालम् - दुडुकुगलनन्न दोरकोडुकु प्रोचुरा

३. **आरभि -** आदितालम् - साधिञ्चेने ओ मनसा

४. **वाराळि -** आदितालम् - कनकनस्थिरा

५. **श्रीरागः -** आदितालम् - एन्दरो महानुभावुलु

क्री.श.१८४७ पूज्य शुद्धदशम्यां निद्रायां श्रीरामः साक्षात्कृत्य दशदिनेषु भौतिक देहत्वं विसर्ज्य मयि सायुज्यं प्राप्स्यसीत्युक्त्वा भगवान् अन्तर्हितः। अन्तिमदिने वागधीश्वरीरागे ''परमात्मुडु जीवात्मुडु'' इति कीर्तनं मनोहरी रागे ''परितापमु'' इति कीर्तनञ्च गानं कृत्वा योगसमाधावुपविवेश। निर्णीतकाले कपालं भित्वा एकं दिव्यंतेजः आकाशेलीनमासीत्।

**आराधना -** त्यागय्यस्य सिद्धिप्राप्तिदिनादारभ्य वर्षे वर्षे शिष्याः पूजां कृत्वा गृहे एव आराधनं कुर्वन्ति स्म। १९०७ आरभ्य तिल्लस्थानं नरसिंहमागतताः पञ्जुभागवताः, वयोलिनू गोविन्द स्वामिपिल्ले महता वैभवेन अत्यन्तं धनं व्ययीकृत्य आराधनमहोत्सवानाचरन्तिस्म। बेंगुलूरु नागरत्नम्म स्वार्जितं सर्वं धनं व्ययीकृत्य १९२५ वर्षे त्यागराजसमाधौ आलयनिर्माणञ्चकार। १९४० वर्षे त्यागब्रह्मणः आराधनमहोत्सवसभा निर्वाहिता। अद्यापि वर्षे वर्षे आराधनोत्सवेषु सहस्राधिकजनाः उपस्थिताः भवन्ति।

तमिलान्ध्रकर्णाटक सङ्गीतेषु कीर्तनरचयितुः त्यागय्यस्य रामभक्तस्य नादब्रह्मोपासनामद्यापि वयं स्मरामः।

**''नादधेनुवुपिण्डि नवनीतमंदिंचे त्यागराजस्वामितन्मयुंडु''**



अल्पक्लेशो मरणं दारिद्र्यमनन्तकं दुःखम्।



## पक्षिणः अपि प्राणत्यागस्यापि संसिद्धाः धर्मरक्षणकृतज्ञतां प्रदर्शयन्ति

- डा.यन्.गुणवती, चरवाणी - ८९१९६२०२२६

रावणासुरेण सीता अपहृता। रामलक्ष्मणाभ्यां दण्डकारण्ये सीता अन्विष्टा। पर्वताकारं रक्तसिक्तं गृध्रराजं जटायुं रामलक्ष्मणौ ददृशतुः। रामः, ''जटायुं अयं मायारूपराक्षसः, मत्प्रियां सीतामपहृत्य खादित्वा विश्रान्तः निद्रामग्नः इति मत्वा धनुरुद्यस्य धनुष्टङ्कारं चकार। रक्तं वमन् दीनस्वरेण जटायुः राममुद्दिश्य राम। रावणः पुण्यवतीं सीतामपहृतवान्। युवाभ्यामभावे सीतां सः नीतः स्यात्। राम! तां मोचयितु तमवरूद्ध्य युद्धं कृतोऽस्मि। रथं धनुश्च मद्यूद्धे पातितावेव रथसारथिः रथबद्ध गार्दभाश्च मया हतावेव। वृद्धत्वात् अस्वास्थ्ये शरीरे, युद्धे सः मत्पाक्षौ खण्डयामास। पश्चाद्वैदेहीं नीत्वा अकाशमार्गे गतः रावणः। तच्छवृत्वा रामः स्रस्ताश्रुलोचनः धनुरासीत्। ततः रामः जटायुमालिलिङ्ग्य दुःखेन भूमावपतत्। ततः लक्ष्मणं दृष्ट्वा सोदर! अयं जटायुः पितुः मित्रम्, मरणदशायां वर्तते इत्युक्त्वा प्राणानप्यपरित्यज्य कृतयुद्धः अयं जाटायुरिति प्रोक्त्वा केन मार्गेण सीतां रावणः नीतवान् इति जटायुं पप्रच्छ। तदा जटायुः मरणावस्थोऽपि राममुद्दिश्य ''रावणासुरः विन्दानामकमुहूर्ते जानकीं नीतवान्। अस्मिन् मूहूर्ते गतं धनं यजमानस्य अवश्यं लभेत्। सः रावणः तद्विषयं नजानाति। त्वं युद्धे रावणं जित्वा अवश्यं सीतां आनीय सुखं प्राप्स्यसि इत्यवोचत् जटायुः। ततः अन्त्याश्वासावस्थायां - ''अयं रावणः विश्वावसुपुत्रः साक्षात् कुबेरसोदरः इति वदन् भूमावपतत्। ततः रामः तीव्रदुःखभरितः लक्ष्मणमुद्दिश्य सीतापहरणदुःखादपि जटायुमरणं मम हृदयं दहति। पिता दशरथ इव अयं मम पूज्यः। मदर्थं मृतस्यास्य दहनसंस्कारं करिष्यामीति लक्ष्मणानीतशुष्केध्मनेषु पक्षिणं निक्षिप्य आहिताग्नयः, यतयः भूदातारः ये मार्गं गच्छन्ति तत्पुण्यलोकानयं गच्छतु इति वदन् यथाविधि दहनसंस्कारान् चकार। स्वर्गगमनार्थं ब्राह्मणैः पठ्यमानपितृदेवतासम्बन्धान् मन्त्रान् सर्वाण् जटायवे संजप्य यथाविधि पिण्डप्रदानश्चकार। ततः शास्त्रप्रकारंरामलक्ष्मणौ गोदावरीनद्यां स्नानमाचर्य जटायोः जलतर्पणं चक्रतुः। एवं पतिव्रतारक्षणार्थं निरायुधोऽपि एकैव वृद्धदशायां प्राणानप्यवगणय्य स्वधर्मं निर्वर्त्य जटायुः दशरथमहाराजेनाप्यप्राप्यं अदृष्टमवाप। स्वयं श्रीरामः एव अन्त्यक्रियाः निर्वर्त्य तस्य जटायोः मोक्षं प्रददौ। कर्तव्ययनिर्वहणे मरणप्राप्तिः योगहेतुरेव इति सर्वेजानन्ति।

अवश्यं लभते कर्ता फलं पापस्य कर्मणः।

तेलुगुमूलम् - मोलका उत्तर फल्गुणी
चित्राणि - श्रीकमल कण्णन्
संस्कृतानुवादः -
डा के.सूर्यनारायणरेड्डि

# धर्मसूक्ष्मः







**नीतिः** जातस्य मरणं धृवम् इति भगवद्गीतायां श्रीकृष्णोक्तरीत्या जातः अवश्यं मृत्युमेति। तादृशमरणमपि आनन्देन अहूतव्यम्। भगवत्सन्निधिः सन्तोषेण प्राप्तव्या इति अस्याः कथायाः नीतिः।



अशोच्या हिपितुः कन्या सद्भर्तुप्रतिपादिता।

# पश्चात्तापः

तेलुगुमूलम् - मोलका उत्तर फल्गुणी, चित्राणि - श्रीकमल कण्णन्, संस्कृतानुवादः - डा के.सूर्यनारायणरेड्डि




**नीतिः** पश्चात्तापात् प्रायश्चित्तं किमपि नास्ति। यस्मिन् समयेऽपि यस्यामपि स्थितौ अन्यप्राणिनः हीनभावनया हिंसा बाधितान् अकृत्वा सर्वेषु प्रेम, दया च प्रदर्शनीये इति कथानीतिः।

# जनवरि 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९८४९२६४६०७





१.मेषराशिः - शुभकालः संप्राप्तः, शान्तस्वभावः, आध्यात्मिकमार्गद्वारा धनलाभः, मनोल्लासः, उद्योगपरिवर्तनम् तीर्थयात्राः भगवद्दर्शनेन उत्साहवर्धनं स्यात्। बन्धुमित्रसमागमः, मृष्टान्नभोजनम् अधिकारजनद्वारा प्रशंसाश्च सम्भवन्ति। शनिग्रहाराधनं कर्तव्यम्।



२.वृषभराशिः - वाक्पारुष्यम् कुटुम्बजनद्वारा विवादाः, तदा तदा ज्वरपीडा, शत्रुपीडा, उद्योगपरिवर्तनम्, वाहनयोगः सम्भवन्ति। विशेषधनलाभः अधिकारजनद्वारा प्रशंसाः, वृथापर्यटनम्, वस्तुप्राप्तिः, निद्राभङ्गः सम्भविष्यन्ति। शिवाराधन कर्तव्यम्।



३. मिथुनराशिः - आरोग्यं, कोपः, गृहे आनन्दोत्साहाः भाग्यलाभः, सम्भविष्यन्त्यपि मासोर्ध्वभागे सोदरविवादाः शरीरन्यूनता, इष्टवस्तुनष्टः दुःस्वप्नानि सम्भविष्यन्ति। लक्ष्मीपूजनं कर्तव्यम्।



४.कर्काटकराशि : - शत्रुपीडा धनव्ययः भूभ्रमणं आध्यात्मिकविद्याव्यासङ्गः कुटुम्बाभिवृद्धि, सोदरलाभः पशुलाभः भूलाभः वाहनयोगः सम्भवन्ति। नवग्रहपूजनं कर्तव्यम्।



५. सिंहराशिः - शरीरास्वास्थ्यं, वृथाविवादाः आत्मन्यूनता, शत्रुपीडा सोदरद्वारा चिन्ता च सम्भविष्यन्त्यपि आध्यात्मिककार्यक्रमेषु निमग्नता, देवतादर्शनं मृष्टान्नभोजनं बन्धुसमागमः भविष्यन्ति। नवग्रहाराधनं कर्तव्यम्।



६. कन्याराशिः - वाहनलाभः उत्साहः शुभकार्येषु संलग्नत्वम् उद्योगपरिवर्तनं कलत्रलाभः विद्याव्यासङ्गेषु विघ्नाः प्रयाणलाभः आलयदर्शनं भ्रातृपीडा सम्भवन्ति। श्रीमहाविष्णोः आराधनं कर्तव्यम्।



७. तुलाराशिः - शुभकाल संप्राप्तिः धनलाभः विद्याव्यासंगेषु उत्साहः पराक्रमः शान्तिः प्रयाणलाभः मृष्टन्नाभोजनं, बन्धुसमागमः सुखजीवनं उद्योगलभः सम्भष्यिन्ति। मासान्ते किंचित् धननष्टं स्यात्। शिवस्य आराधनं करणीयम्।



८. वृश्चिकराशिः - भातृलाभः विद्यालाभः धनव्ययः तीर्थयात्रा, दैवदर्शनं चिन्तितमनोरथसिद्धिः अधिकारजनद्वारा मनोपीडा। वाक्पारुष्यं सम्भविष्यन्त्यपि संघे यशः सौभ्रातृत्वे उत्साहः भविष्यन्ति। शिवाराधनं करणीयम्।



९. धनूराशिः - देशभ्रंशः कलत्रद्वारा धनलाभः राज्यलाभः कार्यसिद्धिः तदा तदा ज्वरपीडा दुर्वार्ताश्रवणं उद्योगप्राप्तिः शुभकार्यसिद्धिः सम्भवन्त्यपि अधिधनलाभः सौभाग्यं च सिद्ध्यन्ति।



१०. मकरराशिः - भोजनहानिः, दुर्वार्ताश्रवणम् तदा तदा सम्भवन्त्यपि अधिकधनव्ययः दैवदर्शनं वाक्पारुष्यं ऐश्वर्य लक्ष्मीप्राप्तिः, भूलाभः विद्यालाभः गर्वभङ्गः, शुभकार्यसिद्धिश्च भविष्यन्ति। शिवाराधनं करणीयम्।



११. कुम्भराशिः - वाक्पारुष्यं स्त्रीजनद्वारासन्तोषः ऐश्वर्यं तदा तदा शरीरहानिः वृथाव्ययः सोदरद्वारानष्टं ज्वरपीडा चिन्तितमनोरथसिद्धिः उत्साहः, धनवव्यः मनसः सन्तोषः अधिकसुखं सम्भवन्ति। नवग्रहाराधनं करणीयम्।



१२. मीनराशिः - अर्थसिद्धिः भोगः आरोग्यं देशभ्रंशः स्वर्णलाभः शत्रुजयः क्रोधः शोषणं अकालभोजनं दुर्वार्ताश्रवणम् आयुर्भीतिः, वस्त्रलाभः सम्भवन्ति। नवग्रहाराधनं करणीयम्।



अहो दुरन्ता बलवद्विरोधिता।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D.,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507.
Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



तिरुचानूरु श्रीपद्मावतीदेवीकार्तिकब्रह्मोत्सवसन्दर्भे 2025 नवम्बर् 20 तिथौ मातुः पद्मावतीदेव्याः सन्दर्शनार्थं आलयं प्रत्यगताः गौरवनीय भारत राष्ट्रपति श्रीमती मुर्मुमहोदयाः। अस्मिन् सन्दर्भे मातुः शेषवस्त्रं, चित्रपटं तीर्थप्रसादान् समर्पयन्तः ति.ति.देवस्थानकार्यनिर्वहणाधिकारिणः श्री अनिल् कुमार् सिंघाल् ऐ.ए.यस्., महोदयाः। अस्मिन् सन्दर्भे गौरवनीयाः आन्ध्रप्रदेश राष्ट्रप्रभुत्वदेवादायशाखामत्याः श्री आनं रामनारायण रेड्डि महोदयाः ति.ति.देवस्थान पालकमण्डलीसभ्याः श्री भानुप्रकास रेड्डि महोदयाश्च भागं गृहीतवन्तः



तिरुमल श्रीवेङ्कटेश्वरदर्शनार्थं 2025 नवम्बर् 21 तिथौ तिरुमलालयंप्रत्यागत गौरवनीयायै राष्ट्रपति मुर्मुमहोदयायै श्रीपतेः शेषवस्त्रं चित्रपटं तीर्थप्रसादान् समर्पयन्तः ति.ति.देवस्थानपालकमण्डल्यध्यक्षाः श्री बि.आर्.नायुडुमहोदयाः ति.ति.देवस्थान कार्यनिर्वहणाधिकारिणः श्री आनिल् कुमार् सिंघाल् ऐ.ए.यस्., महोदयाः। अस्मिन् कार्यक्रमे गौरवनीयाः आन्ध्रप्रदेशराष्ट्रप्रभुत्वदेवादायशाखामात्याः श्री आनं रामनारायणरेड्डि महोदयाः ति.ति.देवस्थानानुबन्ध कार्यनिर्वहणाधिकारिणः श्री सि.हेच्.वेङ्कय्यचौदरि ऐ.आर्.यस्., महोदयाः अन्येच अधिकारिणः भागं गृहीतवन्तः।



तिरुचानूरु श्रीपद्मावतीदेवीकार्तिकब्रह्मोत्सव सन्दर्भे 2025 नवम्बर् 17 तिथौ आन्ध्रप्रदेशराष्ट्रप्रभुत्वपक्षतः मातुः पीताम्बराणि समर्पयन्तः गौरवनीयाः आन्ध्रप्रदेशराष्ट्रप्रभुत्वदेवदायसाखामत्याः श्री आनं रामनारायणरेड्डि महोदयाः। अस्मिरन् सन्दर्भे ति.ति.देवस्थान संयुक्तकार्यनिर्वहणाधिकारिणः श्री वीरब्रह्मं ऐ.ए.यस्., महोदयाः अर्चकाः अन्याधिकारिणश्च भागं गृहीतवन्तः।



तिरुचानूरु श्रीपद्मावतीदेवी कार्तिकब्रह्मोत्सवे पञ्चमीतीर्थोत्सवसन्दर्भे 2025 नवम्बर् 25 तिथौ तिरुमल श्रीवेङ्कटेश्वरालयपक्षतः मातुः पद्मावतीदेव्यै श्रीपतेः उपयनानि ''सारे'' समर्पितवन्तः ति.ति.देवस्थानपालकमण्डल्यध्यक्षाः बि.आर्.नायुडुमहोदयाः, ति.ति. देवस्थान कार्यनिर्वहणाधिकारिणः श्री अनिल्कुमार् सिंघाल् ऐ.ए.यस्., महोदयाः, अनुबन्धकार्यनिर्वहणाधिकारिणः सि.हेच्.वेङ्कय्यचौदरि ऐ.आर्.यस्., महोदयाः अपि च अर्चकाः, अधिकारिणः, अन्ये प्रमुखाश्च भागं गृहीतवन्तः।



तमिलनाडु श्रीवैष्णवक्षेत्रभूतश्रीरङ्गे श्रीरङ्गनाथ स्वामिने 2025 डिसेम्बर् प्रथमतिथौ धर्मपत्न्या सह पीताम्बराणि समर्पितवन्तः ति.ति. देवस्थानपालकमण्डल्यध्यक्षाः श्री बि.आर्.नायुडु महोदयाः।



तिरुमलक्षेत्रे सेवासदन् द्वितीय विभागे 2025 डिसेम्बर् द्वितीयतिथौ निर्वाहिते श्रीपतिसेवकानुद्दिश्य सन्देशं प्रदत्तवन्तः ति.ति.देवस्थानस्य अनुबन्धकार्यनिर्वहणाधिकारिणः श्री सि.हेच्.वेङ्कय्यचौदरि ए.आर्.यस्., महोदयाः।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-12-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.



# श्रीवेङ्कटेश्वरस्वामिनः पारुवेटउत्सवः

(16.01.2026)